**A** SL. No. : ZZ

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 46 ]
Total No. of Questions : 46 ]

**CCE RF**
**CCE RR**
**REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ : **67-S**
**Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : Third Language — SANSKRIT
# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ & ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh & Regular Repeater)**

ದಿನಾಂಕ : 04. 04. 2019 ] [ Date : 04. 04. 2019
ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-00 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-00 Noon
ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

### *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 46 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे षट्चत्वारिंशत् (46) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

**RF + RR (A) - 1033** [ Turn over

इतः कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुम् इतः कर्तयत

Tear here

## भागः - A

### ( गद्य-पद्य-पूरकपाठाः )

### ( अङ्काः - 48 )

I. एकवाक्येन उत्तरं लिखत — 10 × 1 = 10

1. वामनः किमर्थं विरामम् इच्छति ?
2. कः राजा श्रीवैष्णवमतदीक्षां स्वीकृतवान् ?
3. मेलुकोटे कस्मिन् मण्डले अस्ति ?
4. महाबलः केषां चिन्तामणिः ?
5. स्वामी विवेकानन्दः कुत्र गतवान् ?
6. कालपर्ययात् का क्षयं गच्छति ?
7. दिलीपः भूमिं काम् इव शशास ?
8. कतिविधाः जनाः देवं भजन्ते ?
9. पूज्यः शैलः कः ?
10. का अस्मान् बध्नाति ?

II. संयोज्य लिखत — 4 × 1 = 4

| *अ* | | *आ* |
|---|---|---|
| 11. खण्डेन्दुकृतशेखरः | a) | यादवाद्रिः |
| 12. बहुजनाकृष्टं स्थानम् | b) | रावणः |
| 13. यदुगिरिः | c) | संस्कृतग्रामः |
| 14. दाशरथिः | d) | ढण्ढिराजः |
| | e) | श्रीरामः |
| | f) | आञ्जनेयः |

III. **द्वित्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – 2 × 2 = 4

15. गणेशः कीदृशः ?

16. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

**अथवा**

संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।

IV. श्लोकतात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत – 2 × 2 = 4

17. कल्याणि ! त्वद्वियोगेन तीव्रवेगेन ताम्यतः ।

राघवेन्द्रस्य दूतं माम् अन्यथा मास्म मन्यथाः ।।

**अथवा**

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।

18. भारतवासिषु बाह्ये भेदे

बहुत्र बहुधा दृष्टेऽपि ।

आन्तरङ्गिकी संस्कृतिरेका

सनातनी नो बध्नाति ।।

V. संस्कृतभाषया अनुवादं कुरुत – 1 × 2 = 2

19. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

कर्नाटकभाषया अनुवादं कुरुत – 1 × 2 = 2

20. पुरा भोजभूपालस्य सभायाम् अनेके कवयः आसन् । तेषामेकः कालिदासः नाम ।

VI. कवेः देश-काल-ग्रन्थानां विषये लिखत – 1 × 3 = 3

21. वेदव्यासः

**अथवा**

कालिदासः ।

VII. यथानिर्देशम् उत्तरं लिखत – 2 × 3 = 6

22. "मया एतानि सर्वाणि पुस्तकानि पठितानि ।"

क: पाठः ? कः अवदत् ? कम् अवदत् ?

23. "जित्वा पृथिवीं ददामि ।"

क: पाठः ? कः अवदत् ? कम् अवदत् ?

VIII. कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत – 3 × 3 = 9

24. कालिदासेन निरूपितां दिलीपस्य शासनपद्धतिं विवृणुत ।

25. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ?

26. भारतस्य आदर्शनारी "उभयभारती" इति विषयं सङ्गृह्य लिखत ।

**अथवा**

विक्रमवेतालयोः कथां सङ्गृह्य लिखत ।

IX. श्लोकं पूरयत – 1 × 4 = 4

27. शीलं...........................................................................................

...................................................................................................

...................................................................................................

...................................................................................... निधिः ॥

**अथवा**

आरम्भगुर्वी .........................................................................................

...................................................................................................

...................................................................................................

............................................................................... सज्जनानाम् ॥

## भागः - B

### ( व्याकरणविभागः )

### ( अङ्काः - 16 )

X. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत । 12 × 1 = 12

28. "हिमम्" अस्य पर्यायपदम् इदं भवति –

(A) तुषारः (B) जलम्

(C) शीतम् (D) धूमः ।

29. "गुरुस्साक्षात्" इत्यत्र एषः सन्धिः भवति –

(A) गुणसन्धिः (B) सवर्णदीर्घसन्धिः

(C) जश्त्वसन्धिः (D) विसर्गसन्धिः ।

30. "नूतनम्" इत्यस्य विरुद्धार्थकपदम् इदं भवति –

(A) नवीनम् (B) पुरातनम्

(C) अपराधः (D) पराभवम् ।

31. "देवः + इति" इत्यत्र विसर्गस्य स्थाने एषः आदेशः भवति –

(A) उकारादेशः (B) सकारादेशः

(C) लोपादेशः (D) रेफादेशः ।

32. "कुरुक्षेत्र" इत्यत्र एषा विभक्तिः भवति –

(A) तृतीया विभक्तिः (B) चतुर्थी विभक्तिः

(C) षष्ठी विभक्तिः (D) सप्तमी विभक्तिः ।

33. "लम्बोदरः" इत्यत्र एषः समासः भवति –

(A) अव्ययीभाव समासः (B) बहुव्रीहि समासः

(C) तत्पुरुष समासः (D) द्वन्द्व समासः ।

34. "अस्ति" इत्यत्र एषः लकारः भवति –

(A) लोट् लकारः (B) लङ् लकारः

(C) लट् लकारः (D) लृट् लकारः ।

35. "वृक्षस्य समीपम्" इत्यत्र समस्तपदम् एवं भवति –

(A) उपवृक्षम् (B) प्रतिवृक्षम्

(C) वृक्षसमीपम् (D) अनुवृक्षम् ।

36. "तीर्थक्षेत्रम्" इति पदम् अस्मिन् लिङ्गे भवति –

(A) पुँल्लिङ्गे (B) स्त्रीलिङ्गे

(C) नपुंसकलिङ्गे (D) त्रिलिङ्गे ।

37. "गृहे भोजनं खादामः" इत्यत्र भोजनम् इति पदम् अस्मिन् कारके अस्ति –

(A) कर्तृकारके (B) अधिकरणकारके

(C) अपादानकारके (D) कर्मकारके ।

38. "अयच्छत्" इत्यत्र एषः पुरुषः वर्तते –

(A) उत्तमपुरुषः (B) प्रथमपुरुषः

(C) मध्यमपुरुषः (D) अन्यपुरुषः ।

39. करण कारकस्य विभक्तिः एषा भवति –

(A) तृतीया विभक्तिः (B) द्वितीया विभक्तिः

(C) चतुर्थी विभक्तिः (D) प्रथमा विभक्तिः ।

XI. 40. कृदन्तपदं चित्वा लिखत – $1 \times 2 = 2$

i) अर्जुनः कर्णं दृष्ट्वा शिबिरं प्राविशत् ।

ii) शिवेन लोकः रक्षितः ।

41. चतुर्थपदं लिखत – $1 \times 2 = 2$

i) एकस्मिन् काले – एकदा :: सर्वस्मिन् काले – ........................ ।

ii) गुणः अस्य अस्तीति – गुणवान् :: रूपं अस्य अस्तीति – ............................ ।

# भागः - C

## ( रचनाविभागः )

## ( अङ्काः - 16 )

XII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत – 1 × 2 = 2

42. "गगनं गगनाकारम्" ।

XIII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 1 × 2 = 2

43. "सीतां विचेतुं पथि चारणानाम्" ।

XIV. पत्रं लिखत – 1 × 4 = 4

44. मैसरुनगरस्य सर्वकारीयप्रौढशालायाः प्रभा/प्रदीपः इति मत्वा स्वस्य अध्ययनप्रगतिम् उल्लिख्य मित्रं प्रति पत्रं लिखत ।

**अथवा**

दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

XV. प्रबन्धं लिखत – 1 × 4 = 4

45. "संस्कृतभाषायाः गरिमा"

**अथवा**

"परिसरसंरक्षणम्" ।

XVI. गद्यभागं पठित्वा अधोलिखित प्रश्नानाम् उत्तरं लिखत – 4 × 1 = 4

46. हिमवतः पुत्री पार्वती । सा शिवमेव परिणेतुम् इच्छति । सा शिवमुद्दिश्य तपः आचरति । तां परीक्षितुं शिवः ब्रह्मचारिवेषेण आगच्छति । ततः सः शिवस्य स्वरूपं निन्दति । तदा शिवनिन्दाम् असहमाना पार्वती कुपिता भवति । पार्वत्याः अचलप्रेमविदित्वा शिवः मुदितः भवति । एतां पुराणकथाम् आधृत्य "कुमारसम्भवम्" इति महाकाव्यं कालिदासः विरचितवान् ।

i) हिमवतः पुत्री का ?

ii) ब्रह्मचारिवेषेण कः आगच्छति ?

iii) काम् असहमाना पार्वती कुपिता भवति ?

iv) "कुमारसम्भवम्" इति महाकाव्यं कः विरचितवान् ?